# shrIkRRiShNasahasranAmAvaliH

# શ્રીકૃષ્ણસહસ્રનામાવલિઃ

## Document Information

Text title : kRRiShNasahasranAmAvaliH

File name : kRRiShNasahasranAmAvaliH.itx

Category : vishhnu, krishna, sahasranAmAvalI

Location : doc_vishhnu

Proofread by : PSA Easwaran psawaswaran at gmail.com

Latest update : March 10, 2018

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

June 29, 2023

*sanskritdocuments.org*

# શ્રીકૃષ્ણસહસ્રનામાવલિઃ

ૐ કૃષ્ણાય નમઃ । શ્રીવલ્લભાય । શાર્ઙ્ગિણે । વિષ્વક્સેનાય ।
સ્વસિદ્ધિદાય । ક્ષીરોદધામ્ને । વ્યૂહેશાય । શેષશાયિને । જગન્મયાય ।
ભક્તિગમ્યાય । ત્રયીમૂર્તયે । ભારાર્તવસુધાસ્તુતાય । દેવદેવાય ।
દયાસિન્ધવે । દેવાય । દેવશિખામણયે । સુખભાવાય । સુખાધારાય ।
મુકુન્દાય । મુદિતાશયાય નમઃ ॥ ૨૦

ૐ અવિક્રિયાય નમઃ । ક્રિયામૂર્તયે । અધ્યાત્મસ્વસ્વરૂપવતે ।
શિષ્ટાભિલક્ષ્યાય । ભૂતાત્મને । ધર્મત્રાણાર્થચેષ્ટિતાય ।
અન્તર્યામિણે । કાલરૂપાય । કાલાવયવસાક્ષિકાય । વસુધાયાસહરણાય ।
નારદપ્રેરણોન્મુખાય । પ્રભૂષ્ણવે । નારદોદ્ગીતાય ।
લોકરક્ષાપરાયણાય । રૌહિણેયકૃતાનન્દાય । યોગજ્ઞાનનિયોજકાય ।
મહાગુહાન્તર્નિક્ષિપ્તાય । પુરાણવપુષે । આત્મવતે ।
શૂરવંશૈકધિયે નમઃ ॥ ૪૦

ૐ શૌરયે નમઃ । કંસશઙ્કાવિષાદકૃતે । વસુદેવોલ્લસચ્છક્તયે ।
દેવક્યષ્ટમગર્ભગાય । વસુદેવસ્તુતાય । શ્રીમતે । દેવકીનન્દનાય ।
હરયે । આશ્ચર્યબાલાય । શ્રીવત્સલક્ષ્મવક્ષસે । ચતુર્ભુજાય ।
સ્વભાવોત્કૃષ્ટસદ્ભાવાય । કૃષ્ણાષ્ટમ્યન્તસમ્ભવાય ।
પ્રાજાપત્યર્ક્ષસમ્ભૂતાય । નિશીથસમયોદિતાય । શઙ્ખચક્રગદા
પદ્મપાણયે । પદ્મનિભેક્ષણાય । કિરીટિને । કૌસ્તુભોરસ્કાય ।
સ્ફુરન્મકરકુણ્ડલાય નમઃ ॥ ૬૦

ૐ પીતવાસસે નમઃ । ઘનશ્યામાય । કુઞ્ચિતાઞ્ચિતકુન્તલાય ।
સુવ્યક્તવ્યક્તાભરણાય । સૂતિકાગૃહભૂષણાય । કારાગારાન્ધકારઘ્નાય ।
પિતૃપ્રાગ્જન્મસૂચકાય । વસુદેવસ્તુતાય । સ્તોત્રાય ।
તાપત્રયનિવારણાય । નિરવદ્યાય । ક્રિયામૂર્તયે । ન્યાયવાક્યનિયોજકાય ।
અદૃષ્ટચેષ્ટાય । કૂટસ્થાય । ધૃતલૌકિકવિગ્રહાય ।

મહર્ષિમાનસોલ્લસાય । મહીમઙ્ગલદાયકાય । સન્તોષિતસુરવ્રાતાય ।
સાધુચિત્તપ્રસાદકાય નમઃ ॥ ૮૦

ૐ જનકોપાયનિર્દેષ્ટ્રે નમઃ । દેવકીનયનોત્સવાય ।
પિતૃપાણિપરિષ્કારાય । મોહિતાગારરક્ષકાય ।
સ્વશક્ત્યુદ્ધાટિતાશેષકવાટાય । પિતૃવાહકાય ।
શેષોરગફણાચ્છત્રાય । શેષોક્તાખ્યાસહસ્રકાય ।
યમુનાપૂરવિધ્વંસિને । સ્વભાસોદ્ભાસિતવ્રજાય । કૃતાત્મવિદ્યાવિન્યાસાય ।
યોગમાયાગ્રસમ્ભવાય । દુર્ગાનિવેદિતોદ્ભાવાય । યશોદાતલ્પશાયકાય ।
નન્દગોપોત્સવસ્ફૂર્તયે । વ્રજાનન્દકરોદયાય । સુજાતજાતકર્મશ્રિયે ।
ગોપીભદ્રોક્તિનિર્વૃતાય । અલીકનિદ્રોપગમાય ।
પૂતનાસ્તનપીડનાય નમઃ ॥ ૧૦૦

ૐ સ્તન્યાત્તપૂતનાપ્રાણાય નમઃ । પૂતનાક્રોશકારકાય ।
વિન્યસ્તરક્ષાગોધૂલયે । યશોદાકરલાલિતાય । નન્દાઘ્રાતશિરોમધ્યાય ।
પૂતનાસુગતિપ્રદાય । બાલાય । પર્યઙ્કનિદ્રાલવે । મુખાર્પિતપદાઙ્ગુલયે ।
અઞ્જનસ્નિગ્ધનયનાય । પર્યાયાઙ્કુરિતસ્મિતાય । લીલાક્ષાય ।
તરલાલોકાય । શકટાસુરભઞ્જનાય । દ્વિજોદિતસ્વસ્ત્યયનાય ।
મન્ત્રપૂતજલાપ્લુતાય । યશોદોત્સઙ્ગપર્યઙ્કાય । યશોદામુખવીક્ષકાય ।
યશોદાસ્તન્યમુદિતાય । તૃણાવર્તાદિદુસ્સહાય નમઃ ॥ ૧૨૦

ૐ તૃણાવર્તાસુરધ્વંસિને નમઃ । માતૃવિસ્મયકારકાય ।
પ્રશસ્તનામકરણાય । જાનુચઙ્ક્રમણોત્સુકાય ।
વ્યાલમ્બિચૂલિકારત્નાય । ઘોષગોપપ્રહર્ષણાય ।
સ્વમુખપ્રતિબિમ્બાર્થિને । ગ્રીવાવ્યાઘ્રનખોજ્જ્વલાય ।
પઙ્કાનુલેપરુચિરાય । માંસલોરુકટીતટાય । ઘૃષ્ટજાનુકરદ્વન્દ્વાય ।
પ્રતિબિમ્બાનુકારકૃતે । અવ્યક્તવર્ણવાગ્વૃત્તયે । ચઙ્ક્રમાય ।
અનુરૂપવયસ્યાઢ્યાય । ચારુકૌમારચાપલાય । વત્સપુચ્છસમાકૃષ્ટાય ।
વત્સપુચ્છવિકર્ષણાય નમઃ ॥ ૧૪૦

ૐ વિસ્મારિતાન્યવ્યાપારાય નમઃ । ગોપગોપીમુદાવહાય । અકાલવત્સનિર્મોક્ત્રે ।
વજવ્યાક્રોશસુસ્મિતાય । નવનીતમહાચોરાય । દારકાહારદાયકાય ।
પીઠોલૂખલસોપાનાય । ક્ષીરભાણ્ડવિભેદનાય । શિક્યભાણ્ડસમાકર્ષિણે ।
ધ્વાન્તાગારપ્રવેશકૃતે । ભૂષારત્નપ્રકાશાઢ્યાય ।

ગોપ્યુપાલમ્ભભર્ત્સિતાય । પરાગધૂસરાકારાય ।
મૃદ્ભક્ષણકૃતેક્ષણાય । બાલોક્તમૃત્કથારમ્ભાય ।
મિત્રાન્તર્ગૂઢવિગ્રહાય । કૃતસન્ત્રાસલોલાક્ષાય । જનનીપ્રત્યયાવહાય ।
માતૃદૃશ્યાત્તવદનાય । વક્ત્રલક્ષ્યચરાચરાય નમઃ ॥ ૧૬૦

યશોદાલાલિતસ્વાત્મને નમઃ । સ્વયં સ્વાચ્છન્દ્યમોહનાય ।
સવિત્રીસ્નેહસંશ્લિષ્ટાય । સવિત્રીસ્તનલોપાય । નવનીતાર્થનાપ્રહ્વાય ।
નવનીતમહાશનાય । મૃષાકોપપ્રકમ્પોષ્ઠાય । ગોષ્ઠાઙ્ગણવિલોકનાય ।
દધિમન્થઘટીભેત્ત્રે । કિઙ્કિણીક્વાણસૂચિતાય । હૈયઙ્ગવીનાસિકાય ।
મૃષાશ્રવે । ચૌર્યશઙ્કિતાય । જનનીશ્રમવિજ્ઞાત્રે ।
દામબન્ધનિયન્ત્રિતાય । દામાકલ્પાય । ચલાપાઙ્ગાય ।
ગાઢોલૂખલબન્ધનાય । આકૃષ્ટોલૂખલાય । અનન્તાય નમઃ ॥ ૧૮૦

ૐ કુબેરસુતશાપવિદે નમઃ । નારદોક્તિપરામર્શિને ।
યમલાર્જુનભઞ્જનાય । ધનદાત્મજસઙ્ઘુષ્ટાય ।
નન્દમોચિતબન્ધનાય । બાલકોદ્ગીતનિરતાય । બાહુક્ષેપોદિતપ્રિયાય ।
આત્મજ્ઞાય । મિત્રવશ્યાય । ગોપીગીતગુણોદયાય । પ્રસ્થાનશકટારૂઢાય ।
વૃન્દાવનકૃતાલયાય । ગોવત્સપાલનૈકાગ્રાય । નાનાક્રીડાપરિચ્છદાય ।
ક્ષેપણીક્ષેપણપ્રીતાય । વેણુવાદ્યવિશારદાય । વૃષવત્સાનુકરણાય ।
વૃષધ્વાનવિડમ્બનાય । નિયુદ્ધલીલાસંહૃષ્ટાય ।
કૂજાનુકૃતકોકિલાય નમઃ ॥ ૨૦૦

ૐ ઉપાત્તહંસગમનાય નમઃ । સર્વજન્તુરુતાનુકૃતે । ભૃઙ્ગાનુકારિણે ।
દધ્યન્નચોરાય । વત્સપુરસ્સરાય । બલિને । બકાસુરગ્રાહિણે ।
બકતાલુપ્રદાહકાય । ભીતગોપાર્ભકાહૂતાય । બકચઞ્ચુવિદારણાય ।
બકાસુરારયે । ગોપાલાય । બાલાય । બાલાદ્ભુતાવહાય ।
બલભદ્રસમાશ્લિષ્ટાય । કૃતક્રીડાનિલાયનાય । ક્રીડાસેતુવિધાનજ્ઞાય ।
પ્લવઙ્ગોત્પ્લવનાય । અદ્ભુતાય । કન્દુકક્રીડનાય નમઃ ॥ ૨૨૦

ૐ લુપ્તનન્દાદિભવવેદનાય નમઃ ।
સુમનોઽલઙ્કૃતશિરસે । સ્વાદુસ્નિગ્ધાન્નશિક્યભૃતે ।
ગુઞ્જાપ્રાલમ્બનચ્છન્નાય । પિઞ્છૈરલકવેષકૃતે ।
વન્યાશનપ્રિયાય । શૃઙ્ગરવાકારિતવત્સકાય ।
મનોજ્ઞપલ્લવોત્તંસપુષ્પસ્વેચ્છાત્તષટ્પદાય ।

મઞ્જુશિઞ્જિતમઞ્જીરચરણાય । કરકઙ્કણાય । અન્યોન્યશાસનાય ।
ક્રીડાપટવે । પરમકૈતવાય । પ્રતિધ્વાનપ્રમુદિતાય ।
શાખાચતુરચઙ્ક્રમાય । અઘદાનવસંહર્ત્રે । વ્રજવિઘ્નવિનાશનાય ।
વ્રજસઞ્જીવનાય । શ્રેયોનિધયે । દાનવમુક્તિદાય નમઃ ॥ ૨૪૦

ૐ કાલિન્દીપુલિનાસીનાય નમઃ । સહભુક્તવ્રજાર્ભકાય ।
કક્ષાજઠરવિન્યસ્તવેણવે । વલ્લવચેષ્ટિતાય ।
ભુજસન્ધ્યન્તરન્યસ્તશ‍ૃઙ્ગવેત્રાય । શુચિસ્મિતાય ।
વામપાણિસ્થદધ્યન્નકબલાય । કલભાષણાય ।
અઙ્ગુલ્યન્તરવિન્યસ્તફલાય । પરમપાવનાય । અદૃશ્યતર્ણકાન્વેષિણે ।
વલ્લવાર્ભકભીતિઘ્ને । અદૃષ્ટવત્સપવ્રાતાય ।
બ્રહ્મવિજ્ઞાતવૈભવાય । ગોવત્સવત્સપાન્વેષિણે । વિરાટ્પુરુષવિગ્રહાય ।
સ્વસઙ્કલ્પાનુરૂપાર્થવત્સવત્સપરૂપધૃતે । યથાવત્સક્રિયારૂપાય ।
યથાસ્થાનનિવેશનાય । યથાવ્રજાર્ભકાકારાય નમઃ ॥ ૨૬૦

ૐ ગોગોપીસ્તન્યપાય નમઃ । સુખિને । ચિરાદ્બલોહિતાય ।
દાન્તાય । બ્રહ્મવિજ્ઞાતવૈભવાય । વિચિત્રશક્તયે ।
વ્યાલીનસૃષ્ટગોવત્સવત્સપાય । ધાતૃસ્તુતાય । સર્વાર્થસાધકાય ।
બ્રહ્મણે । બ્રહ્મમયાય । અવ્યક્તાય । તેજોરૂપાય । સુખાત્મકાય ।
નિરુક્તાય । વ્યાકૃતયે । વ્યક્તાય । નિરાલમ્બનભાવનાય ।
પ્રભવિષ્ણવે નમઃ ॥ ૨૮૦

ૐ અતન્ત્રીકાય નમઃ । દેવપક્ષાર્થરૂપધૃતે । અકામાય ।
સર્વવેદાદયે । અણીયસે । સ્થૂલરૂપવતે । વ્યાપિને । વ્યાપ્યાય ।
કૃપાકર્ત્રે । વિચિત્રાચારસમ્મતાય । છન્દોમયાય । પ્રધાનાત્મને ।
મૂર્તામૂર્તદ્વયાકૃતયે । અનેકમૂર્તયે । અક્રોધાય । પરસ્મૈ ।
પ્રકૃતયે । અક્રમાય । સકલાવરણોપેતાય । સર્વદેવાય નમઃ ॥ ૩૦૦

ૐ મહેશ્વરાય નમઃ । મહાપ્રભાવનાય । પૂર્વવત્સવત્સપદર્શકાય ।
કૃષ્ણયાદવગોપાલાય । ગોપાલોકનહર્ષિતાય । સ્મિતેક્ષાહર્ષિતબ્રહ્મણે ।
ભક્તવત્સલવાક્પ્રિયાય । બ્રહ્માનન્દાશ્રુધૌતાઙ્ઘ્રયે ।
લીલાવૈચિત્ર્યકોવિદાય । બલભદ્રૈકહૃદયાય ।
નામાકારિતગોકુલાય । ગોપાલબાલકાય । ભવ્યાય । રજ્જુયજ્ઞોપવીતવતે ।
વૃક્ષચ્છાયાહતાશાન્તયે । ગોપોત્સઙ્ગોપબર્હિણાય । ગોપસંવાહિતપદાય ।

ગોપવ્યજનવીજિતાય । ગોપગાનસુખોન્નિદ્રાય ।
શ્રીદામાર્જિતસૌહૃદાય નમઃ ॥ ૩૨૦

ૐ સુનન્દસુહૃદે નમઃ । એકાત્મને । સુબલપ્રાણરઞ્જનાય ।
તાલીવનકૃતક્રીડાય । બલપાતિતધેનુકાય । ગોપીસૌભાગ્યસમ્ભાવ્યાય ।
ગોધૂલિચ્છુરિતાલકાય । ગોપીવિરહસન્તપ્તાય ।
ગોપિકાકૃતમજ્જનાય । પ્રલમ્બબાહવે । ઉત્ફુલ્લપુણ્ડરીકાવતંસકાય ।
વિલાસલલિતસ્મેરગર્ભલીલાવલોકનાય । સ્રગ્ભૂષણાનુલેપાઢ્યાય ।
જનન્યુપહૃતાન્નભુજે । વરશય્યાશયાય । રાધાપ્રેમસલ્લાપનિર્વૃતાય ।
યમુનાતટસઞ્ચારિણે । વિષાર્તવ્રજહર્ષદાય । કાલિયક્રોધજનકાય ।
વૃદ્ધાહિકુલવેષ્ટિતાય નમઃ ॥ ૩૪૦

ૐ કાલિયાહિફણારઙ્ગનટાય નમઃ । કાલિયમર્દનાય ।
નાગપત્નીસ્તુતિપ્રીતાય । નાનાવેષસમૃદ્ધિકૃતે । અવિષ્વક્તદૃશે ।
આત્મેશાય । સ્વદૃશે । આત્મસ્તુતિપ્રિયાય । સર્વેશ્વરાય । સર્વગુણાય ।
પ્રસિદ્ધાય । સર્વસાત્વતાય । અકુણ્ઠધામ્ને । ચન્દ્રાર્કદૃષ્ટયે ।
આકાશનિર્મલાય । અનિર્દેશ્યગતયે । નાગવનિતાપતિભૈક્ષદાય ।
સ્વાઙ્ઘ્રિમુદ્રાઙ્કનાગેન્દ્રમૂર્ધ્ને । કાલિયસંસ્તુતાય ।
અભયાય નમઃ ॥ ૩૬૦

ૐ વિશ્વતશ્ચક્ષુષે નમઃ । સ્તુતોત્તમગુણાય । પ્રભવે ।
મહ્યમ્ । આત્મને । મરુતે । પ્રાણાય । પરમાત્મને । દ્યુશીર્ષવતે ।
નાગોપાયનહૃષ્ટાત્મને । હૃદોત્સારિતકાલિયાય । બલભદ્રસુખાલાપાય ।
ગોપાલિઙ્ગનનિર્વૃતાય । દાવાગ્નિભીતગોપાલગોપ્ત્રે । દાવાગ્નિનાશનાય ।
નયનાચ્છાદનક્રીડાલમ્પટાય । નૃપચેષ્ટિતાય । કાકપક્ષધરાય ।
સૌમ્યાય । બલવાહકકેલિમતે નમઃ ॥ ૩૮૦

ૐ બલઘાતિતદુર્ધર્ષપ્રલમ્બાય નમઃ । બલવત્સલાય ।
મુઞ્જાટવ્યગ્નિશમનાય । પ્રાવૃટ્કાલવિનોદવતે । શિલાન્યસ્તાન્નભૃતે ।
દૈત્યસંહર્ત્રે । શાદ્વલાસનાય । સદાપ્તગોપિકોદ્ગીતાય ।
કર્ણિકારાવતંસકાય । નટવેષધરાય । પદ્મમાલાઙ્કાય । ગોપિકાવૃતાય ।
ગોપીમનોહરાપાઙ્ગાય । વેણુવાદનતત્પરાય । વિન્યસ્તવદનામ્ભોજાય ।
ચારુશબ્દકૃતાનનાય । બિમ્બાધરાર્પિતોદારવેણવે । વિશ્વવિમોહનાય ।
વ્રજસંવર્ણિતાય । શ્રાવ્યવેણુનાદાય ॥ ૪૦૦

ૐ શ્રુતિપ્રિયાય નમઃ । ગોગોપગોપીજન્મેપ્સુ બ્રહ્મેન્દ્રાદ્યભિવન્દિતાય ।
ગીતસ્રુતિસરિત્પૂરાય નમઃ । નાદનર્તિતબર્હિણાય । રાગપલ્લવિતસ્થાણવે ।
ગીતાનમિતપાદપાય । વિસ્મારિતતૃણગ્રાસમૃગાય । મૃગવિલોભિતાય ।
વ્યાઘ્રાદિહિંસ્રસહજવૈરહર્ત્રે । સુગાયનાય । ગાઢોદીરિતગોવૃન્દ
પ્રેમોત્કર્ણિતતર્ણકાય । નિષ્પન્દયાનબ્રહ્માદિવીક્ષિતાય ।
વિશ્વવન્દિતાય । શાખોત્કર્ણશકુન્તૌઘાય । છત્રાયિતબલાહકાય ।
પ્રસન્નાય । પરમાનન્દાય । ચિત્રાયિતચરાચરાય । ગોપિકામદનાય ।
ગોપીકુચકુઙ્કુમમુદ્રિતાય નમઃ ॥ ૪૨૦

ૐ ગોપકન્યાજલક્રીડાહૃષ્ટાય નમઃ । ગોપ્યંશુકાપહૃતે ।
સ્કન્ધારોપિતગોપસ્ત્રીવાસસે । કુન્દનિભસ્મિતાય ।
ગોપીનેત્રોત્પલશશિને । ગોપિકાયાચિતાંશુકાય । ગોપીનમસ્ક્રિયાદેષ્ટ્રે ।
ગોપ્યેકકરવન્દિતાય । ગોપ્યઞ્જલિવિશેષાર્થિને । ગોપીક્રીડાવિલોભિતાય ।
શાન્તવાસસ્ફુરદ્ગોપીકૃતાઞ્જલયે । અઘાપહાય । ગોપીકેલિવિલાસાર્થિને ।
ગોપીસમ્પૂર્ણકામદાય । ગોપસ્ત્રીવસ્ત્રદાય । ગોપીચિત્તચોરાય । કુતૂહલિને ।
વૃન્દાવનપ્રિયાય । ગોપબન્ધવે । યજ્વાન્નયાચિત્રે નમઃ ॥ ૪૪૦

ૐ યજ્ઞેશાય નમઃ । યજ્ઞભાવજ્ઞાય । યજ્ઞપત્ન્યભિવાઞ્છિતાય ।
મુનિપત્નીવિતીર્ણાન્નતૃપ્તાય । મુનિવધૂપ્રિયાય ।
દ્વિજપત્ન્યભિભાવજ્ઞાય । દ્વિજપત્નીવરપ્રદાય ।
પ્રતિરુદ્ધસતીમોક્ષપ્રદાય । દ્વિજવિમોહિત્રે । મુનિજ્ઞાનપ્રદાય ।
યજ્વસ્તુતાય । વાસવયાગવિદે । પિતૃપ્રોક્તક્રિયારૂપશક્રયાગનિવારણાય ।
શક્રામર્ષકરાય । શક્રવૃષ્ટિપ્રશમનોન્મુખાય ।
ગોવર્ધનધરાય । ગોપગોવૃન્દત્રાણતત્પરાય ।
ગોવર્ધનગિરિચ્છાત્રચણ્ડદણ્ડભુજાર્ગલાય । સપ્તાહવિધૃતાદ્રીન્દ્રાય ।
મેઘવાહનગર્વઘ્ને નમઃ ॥ ૪૬૦

ૐ ભુજાગ્રોપરિવિન્યસ્તક્ષ્માધરક્ષ્માભૃતે નમઃ । અચ્યુતાય ।
સ્વસ્થાનસ્થાપિતગિરયે નમઃ । ગોપીદધ્યક્ષતાર્ચિતાય । સુમનસે ।
સુમનોવૃષ્ટિહૃષ્ટાય । વાસવવન્દિતાય । કામધેનુપયઃપૂરાભિષિક્તાય ।
સુરભિસ્તુતાય । ધરાઙ્ઘ્રયે । ઓષધીરોમ્ણે । ધર્મગોપ્ત્રે ।
મનોમયાય । જ્ઞાનયજ્ઞપ્રિયાય । શાસ્ત્રનેત્રાય । સર્વાર્થસારથયે ।
ઐરાવતકરાનીતવિયદ્ગઙ્ગાપ્લુતાય । વિભવે । બ્રહ્માભિષિક્તાય ।
ગોગોપ્ત્રે નમઃ ॥ ૪૮૦

ૐ સર્વલોકશુભઙ્કરાય નમઃ । સર્વવેદમયાય ।
મગ્નનન્દાન્વેષિણે । પિતૃપ્રિયાય । વરુણોદીરિતાત્મેક્ષાકૌતુકાય ।
વરુણાર્ચિતાય । વરુણાનીતજનકાય । ગોપજ્ઞાતાત્મવૈભવાય ।
સ્વર્લોકાલોકસંહૃષ્ટગોપવર્ગાય । ત્રિવર્ગદાય । બ્રહ્મહૃદ્ગોપિતાય ।
ગોપદ્રષ્ટ્રે । બ્રહ્મપદપ્રદાય । શરચ્ચન્દ્રવિહારોત્કાય । શ્રીપતયે ।
વશકાય । ક્ષમાય । ભયાપહાય । ભર્તૃરુદ્ધગોપિકાધ્યાનગોચરાય ।
ગોપિકાનયનાસ્વાદ્યાય નમઃ ॥ ૫૦૦

ૐ ગોપીનર્મોક્તિનિવૃતાય નમઃ । ગોપિકામાનહરણાય ।
ગોપિકાશતયૂથપાય । વૈજયન્તીસ્રગાકલ્પાય । ગોપિકામાનવર્ધનાય ।
ગોપકાન્તાસુનિર્દેષ્ટ્રે । કાન્તાય । મન્મથમન્મથાય ।
સ્વાત્માસ્યદત્તતામ્બૂલાય । ફલિતોત્કૃષ્ટયૌવનાય ।
વલ્લભીસ્તનસક્તાક્ષાય । વલ્લબીપ્રેમચાલિતાય । ગોપીચેલાઞ્ચલાસીનાય ।
ગોપીનેત્રાબ્જષટ્પદાય । રાસક્રીડાસમાસક્તાય । ગોપીમણ્ડલમણ્ડનાય ।
ગોપીહેમમણિશ્રેણિમધ્યેન્દ્રમણયે । ઉજ્જ્વલાય । વિદ્યાધરેન્દુશાપઘ્નાય ।
શઙ્ખચૂડશિરોહરાય નમઃ ॥ ૫૨૦

ૐ શઙ્ખચૂડશિરોરત્નસમ્પ્રીણિતબલાય નમઃ । અનઘાય ।
અરિષ્ટારિષ્ટકૃતે । દુષ્ટકેશિદૈત્યનિષૂદનાય । સરસાય ।
સસ્મિતમુખાય । સુસ્થિરાય । વિરહાકુલાય । સઙ્કર્ષણાર્પિતપ્રીતયે ।
અક્રૂરધ્યાનગોચરાય । અક્રૂરસંસ્તુતાય । ગૂઢાય ।
ગુણવૃત્ત્યુપલક્ષિતાય । પ્રમાણગમ્યાય । તન્માત્રાવયવિને ।
બુદ્ધિતત્પરાય । સર્વપ્રમાણપ્રમથિને । સર્વપ્રત્યયસાધકાય ।
પુરુષાય । પ્રધાનાત્મને નમઃ ॥ ૫૪૦

ૐ વિપર્યાસવિલોચનાય નમઃ । મધુરાજનસંવીક્ષ્યાય ।
રજકપ્રતિઘાતકાય । વિચિત્રામ્બરસંવીતાય । માલાકારવરપ્રદાય ।
કુબ્જાવક્રત્વનિર્મોક્ત્રે । કુબ્જાયૌવનદાયકાય । કુબ્જાઙ્ગરાગસુરભયે ।
કંસકોદણ્ડખણ્ડનાય । ધીરાય । કુવલયાપીડમર્દનાય ।
કંસભીતિકૃતે । દન્તિદન્તાયુધાય । રઙ્ગત્રાસકાય । મલ્લયુદ્ધવિદે ।
ચાણૂરહન્ત્રે । કંસારયે । દેવકીહર્ષદાયકાય । વસુદેવપદાનમ્રાય ।
પિતૃબન્ધવિમોચનાય નમઃ ॥ ૫૬૦

ૐ ઉર્વીભયાપહાય નમઃ । ભૂપાય । ઉગ્રસેનાધિપત્યદાય ।
આજ્ઞાસ્થિતશચીનાથાય । સુધર્માનયનક્ષમાય ।
આદ્યાય । દ્વિજાતિસત્કર્ત્રે । શિષ્ટાચારપ્રદર્શકાય ।
સાન્દીપનિકૃતાભ્યસ્તવિદ્યાભ્યાસૈકધિયે । સુધયે ।
ગુર્વભીષ્ટક્રિયાદક્ષાય । પશ્ચિમોદધિપૂજિતાય ।
હતપઞ્ચજનપ્રાપ્તપાઞ્ચજન્યાય । યમાર્ચિતાય ।
ધર્મરાજજયાનીતગુરુપુત્રાય । ઉરુક્રમાય । ગુરુપુત્રપ્રદાય । શાસ્ત્રે ।
મધુરાજનમાનદાય । જામદગ્ન્યસમભ્યર્ચ્યાય નમઃ ॥ ૫૮૦

ૐ ગોમન્તગિરિસઞ્ચરાય નમઃ । ગોમન્તદાવશમનાય ।
ગરુડાનીતભૂષણાય । ચક્રાદ્યાયુધસંશોભિને । જરાસન્ધમદાપહાય ।
સૃગાલાવનિપાલઘ્નાય । સૃગાલાત્મજરાજ્યદાય । વિધ્વસ્તકાલયવનાય ।
મુચુકુન્દવરપ્રદાય । આજ્ઞાપિતમહામ્ભોધયે । દ્વારકાપુરકલ્પનાય ।
દ્વારકાનિલયાય । રુક્મિમાનહન્ત્રે । યદૂદ્વહાય । રુચિરાય ।
રુક્મિણીજાનયે । પ્રદ્યુમ્નજનકાય । પ્રભવે । અપાકૃતત્રિલોકાર્તયે ।
અનિરુદ્ધપિતામહાય નમઃ ॥ ૬૦૦

ૐ અનિરુદ્ધપદાન્વેષિણે નમઃ । ચક્રિણે । ગરુડવાહનાય ।
બાણાસુરપુરીરોદ્ધ્રે । રક્ષાજ્વલનયન્ત્રજિતે । ધૂતપ્રમથસંરમ્ભાય ।
જિતમાહેશ્વરજ્વરાય । ષટ્ચક્રશક્તિનિર્જેત્રે । ભૂતભેતાલમોહકૃતે ।
શમ્ભુત્રિશૂલજિતે । શમ્ભુજૃમ્ભણાય । શમ્ભુસંસ્તુતાય ।
ઇન્દ્રિયાત્મને । ઇન્દુહૃદયાય । સર્વયોગેશ્વરેશ્વરાય ।
હિરણ્યગર્ભહૃદયાય । મોહાવર્તનિવર્તનાય । આત્મજ્ઞાનનિધયે ।
મેધાકોશાય । તન્માત્રરૂપવતે નમઃ ॥ ૬૨૦

ૐ ઇન્દ્રાય નમઃ । અગ્નિવદનાય । કાલનાભાય । સર્વાગમાધ્વગાય ।
તુરીયાય । સર્વધીસાક્ષિણે । દ્વન્દ્વારામાત્મદૂરગાય । અજ્ઞાતપારાય ।
વશ્યશ્રિયૈ । અવ્યાકૃતવિહારવતે । આત્મપ્રદીપાય । વિજ્ઞાનમાત્રાત્મને ।
શ્રીનિકેતનાય । બાણબાહુવનચ્છેત્રે । મહેન્દ્રપ્રીતિવર્ધનાય ।
અનિરુદ્ધનિરોધજ્ઞાય । જલેશાહૃતગોકુલાય । જલેશવિજયિને ।
વીરાય । સત્રાજિદ્રત્નયાચકાય નમઃ ॥ ૬૪૦

ૐ પ્રસેનાન્વેષણોદ્યુક્તાય નમઃ । જામ્બવદ્ધૃતરત્નદાય ।
જિતર્ક્ષરાજતનયાહર્ત્રે । જામ્બવતીપ્રિયાય । સત્યભામાપ્રિયાય ।

કામાય । શતધન્વશિરોહરાય । કાલિન્દીપતયે । અક્રૂરબન્ધવે ।
અક્રૂરરત્નદાય । કૈકયીરમણાય । ભદ્રાભર્ત્રે । નાગ્નજિતીધવાય ।
માદ્રીમનોહરાય । શબ્યાપ્રાણબન્ધવે । ઉરુક્રમાય ।
સુશીલાદયિતાય । મિત્રવિન્દાનેત્રમહોત્સવાય । લક્ષ્મણાવલ્લભાય ।
રુદ્ધપ્રાગ્જ્યોતિષમહાપુરાય નમઃ ॥ ૬૬૦

ૐ સુરપાશાવૃતિચ્છેદિને નમઃ । મુરારયે । ક્રૂરયુદ્ધવિદે ।
હયગ્રીવશિરોહર્ત્રે । સર્વાત્મને । સર્વદર્શનાય । નરકાસુરવિચ્છેત્રે ।
નરકાત્મજરાજ્યદાય । પૃથ્વીસ્તુતાય । પ્રકાશાત્મને । હૃદ્યાય ।
યજ્ઞફલપ્રદાય । ગુણગ્રાહિણે । ગુણદ્રષ્ટ્રે । ગૂઢસ્વાત્મને ।
વિભૂતિમતે । કવયે । જગદુપદ્રષ્ટ્રે । પરમાક્ષરવિગ્રહાય ।
પ્રપન્નપાલનાય નમઃ ॥ ૬૮૦

ૐ માલિને નમઃ । મહતે । બ્રહ્મવિવર્ધનાય । વાચ્યવાચકશક્ત્યર્થાય ।
સર્વવ્યાકૃતસિદ્ધિદાય । સ્વયમ્પ્રભવે । અનિર્વેદ્યાય । સ્વપ્રકાશાય ।
ચિરન્તનાય । નાદાત્મને । મન્ત્રકોટીશાય । નાનાવાદનિરોધકાય ।
કન્દર્પકોટિલાવણ્યાય । પરાર્થૈકપ્રયોજકાય । અમરીકૃતદેવૌઘાય ।
કન્યકાબન્ધમોચનાય । ષોડશસ્ત્રીસહસ્રેશાય । કાન્તાય ।
કાન્તામનોભવાય । ક્રીડારત્નાચલાહર્ત્રે નમઃ ॥ ૭૦૦

ૐ વરુણચ્છત્રશોભિતાય નમઃ । શક્રાભિવન્દિતાય ।
શક્રજનનીકુણ્ડલપ્રદાય । અદિતિપ્રસ્તુતસ્તોત્રાય ।
બ્રાહ્મણોદ્ઘુષ્ટચેષ્ટનાય । પુરાણાય નમઃ । સંયમિને । જન્માલિપ્તાય ।
ષડ્વિંશકાય । અર્થદાય । યશસ્યનીતયે । આદ્યન્તરહિતાય ।
સત્કથાપ્રિયાય । બ્રહ્મબોધાય । પરાનન્દાય । પારિજાતાપહારકાય ।
પૌણ્ડ્રકપ્રાણહરણાય । કાશિરાજનિષૂદનાય । કૃત્યાગર્વપ્રશમનાય ।
વિચક્રવધદીક્ષિતાય નમઃ ॥ ૭૨૦

ૐ હંસવિધ્વંસનાય નમઃ । સામ્બજનકાય । ડિમ્ભકાર્દનાય ।
મુનયે । ગોપ્ત્રે । પિતૃવરપ્રદાય નમઃ । સવનદીક્ષિતાય ।
રથિને । સારથ્યનિર્દેષ્ટ્રે । ફાલ્ગુનાય । ફાલ્ગુનિપ્રિયાય ।
સપ્તાબ્ધિસ્તમ્ભનોદ્ભૂતાય । હરયે । સપ્તાબ્ધિભેદનાય ।
આત્મપ્રકાશાય । પૂર્ણશ્રિયે । આદિનારાયણેક્ષિતાય । વિપ્રપુત્રપ્રદાય ।
સર્વમાતૃસુતપ્રદાય । પાર્થવિસ્મયકૃતે નમઃ ॥ ૭૪૦

ૐ પાર્થપ્રણવાર્થપ્રબોધનાય નમઃ । કૈલાસયાત્રાસુમુખાય ।
બદર્યાશ્રમભૂષણાય । ઘણ્ટાકર્ણક્રિયામૌઢ્યાત્તેષિતાય ।
ભક્તવત્સલાય । મુનિવૃન્દાદિભિર્ધ્યેયાય । ઘણ્ટાકર્ણવરપ્રદાય ।
તપશ્ચર્યાપરાય । ચીરવાસસે । પિઙ્ગજટાધરાય ।
પ્રત્યક્ષીકૃતભૂતેશાય । શિવસ્તોત્રે । શિવસ્તુતાય ।
કૃષ્ણાસ્વયંવરાલોકકૌતુકિને । સર્વસમ્મતાય । બલસંરમ્ભશમનાય ।
બલદર્શિતપાણ્ડવાય । યતિવેષાર્જુનાભીષ્ટદાયિને । સર્વાત્મગોચરાય ।
સુભદ્રાફાલ્ગુનોદ્વાહકર્ત્રે નમઃ ॥ ૭૬૦

ૐ પ્રીણિતફાલ્ગુનાય નમઃ । ખાણ્ડવપ્રીણીતાર્ચિષ્મતે ।
મયદાનવમોચનાય । સુલભાય । રાજસૂયાર્હયુધિષ્ઠિરનિયોજકાય ।
ભીમાર્દિતજરાસન્ધાય । માગધાત્મજરાજ્યદાય । રાજબન્ધનનિર્મોક્ત્રે ।
રાજસૂયાગ્રપૂજનાય । ચૈદ્યાદ્યસહનાય । ભીષ્મસ્તુતાય ।
સાત્વતપૂર્વજાય । સર્વાત્મને । અર્થસમાહર્ત્રે । મન્દરાચલધારકાય ।
યજ્ઞાવતારાય । પ્રહ્લાદપ્રતિજ્ઞાપરિપાલકાય । બલિયજ્ઞસભાધ્વંસિને ।
દૃપ્તક્ષત્રકુલાન્તકાય । દશગ્રીવાન્તકાય નમઃ ॥ ૭૮૦

ઓઞ્જેત્રે નમઃ । રેવતીપ્રેમવલ્લભાય । સર્વાવતારાધિષ્ઠાત્રે ।
વેદબાહ્યવિમોહનાય । કલિદોષનિરાકર્ત્રે નમઃ । દશનામ્ને ।
દૃઢવ્રતાય । અમેયાત્મને । જગત્સ્વામિને । વાગ્મિને । ચૈદ્યશિરોહરાય ।
દ્રૌપદીરચિતસ્તોત્રાય । કેશવાય । પુરુષોત્તમાય । નારાયણાય ।
મધુપતયે । માધવાય । દોષવર્જિતાય । ગોવિન્દાય ।
પુણ્ડરીકાક્ષાય નમઃ ॥ ૮૦૦

ૐ વિષ્ણવે નમઃ । મધુસૂદનાય । ત્રિવિક્રમાય । ત્રિલોકેશાય । વામનાય ।
શ્રીધરાય । પુંસે । હૃષીકેશાય । વાસુદેવાય । પદ્મનાભાય ।
મહાહ્રદાય । દામોદરાય । ચતુર્વ્યૂહાય । પાઞ્ચાલીમાનરક્ષણાય ।
સાલ્વઘ્નાય । સમરશ્લાઘિને । દન્તવક્ત્રનિબર્હણાય ।
દામોદરપ્રિયસખાય । પૃથુકાસ્વાદનપ્રિયાય । ઘૃણીને નમઃ ॥ ૮૨૦

ૐ દામોદરાય નમઃ । શ્રીદાય । ગોપીપુનરવેક્ષકાય । ગોપિકામુક્તિદાય ।
યોગિને । દુર્વાસસ્તૃપ્તિકારકાય । અવિજ્ઞાતવ્રજાકીર્ણપાણ્ડવાલોકનાય ।
જયિને । પાર્થસારથ્યનિરતાય । પ્રાજ્ઞાય । પાણ્ડવદૌત્યકૃતે ।
વિદુરાતિથ્યસન્તુષ્ટાય । કુન્તીસન્તોષદાયકાય । સુયોધનતિરસ્કર્ત્રે ।

દુર્યોધનવિકારવિદે । વિદુરાભિષ્ટુતાય । નિત્યાય । વાર્ષ્ણેયાય ।
મઙ્ગલાત્મકાય । પઞ્ચવિંશતિતત્ત્વેશાય નમઃ ॥ ૮૪૦

ૐ ચતુર્વિંશતિદેહભાજે નમઃ । સર્વાનુગ્રાહકાય ।
સર્વદાશાર્હસતતાર્ચિતાય । અચિન્ત્યાય । મધુરાલાપાય । સાધુદર્શિને ।
દુરાસદાય । મનુષ્યધર્માનુગતાય । કૌરવેન્દ્રક્ષયેક્ષિત્રે ।
ઉપેન્દ્રાય । દાનવારાતયે । ઉરુગીતાય । મહાદ્યુતયે । બ્રહ્મણ્યદેવાય ।
શ્રુતિમતે । ગોબ્રાહ્મણહિતાશયાય । વરશીલાય । શિવારમ્ભાય ।
સુવિજ્ઞાનવિમૂર્તિમતે । સ્વભાવશુદ્ધાય નમઃ ॥ ૮૬૦

ૐ સન્મિત્રાય । સુશરણ્યાય । સુલક્ષણાય ।
ધૃતરાષ્ટ્રગતાય । દૃષ્ટિપ્રદાય । કર્ણવિભેદનાય । પ્રતોદધૃતે ।
(ધૃતરાષ્ટ્રગતદૃષ્ટિપ્રદાય)
વિશ્વરૂપવિસ્મારિતધનઞ્જયાય । સામગાનપ્રિયાય । ધર્મધેનવે ।
વર્ણોત્તમાય । અવ્યયાય । ચતુર્યુગક્રિયાકર્ત્રે । વિશ્વરૂપપ્રદર્શકાય ।
બ્રહ્મબોધપરિત્રાતપાર્થાય । ભીષ્માર્થચક્રભૃતે ।
અર્જુનાયાસવિધ્વંસિને । કાલદંષ્ટ્રાવિભૂષણાય । સુજાતાનન્તમહિમ્ને ।
સ્વપ્નવ્યાપારિતાર્જુનાય નમઃ ॥ ૮૮૦

ૐ અકાલસન્ધ્યાઘટનાય નમઃ । ચક્રાન્તરિતભાસ્કરાય ।
દુષ્ટપ્રમથનાય । પાર્થપ્રતિજ્ઞાપરિપાલકાય ।
સિન્ધુરાજશિરઃપાતસ્થાનવક્ત્રે । વિવેકદૃશે ।
સુભદ્રાશોકહરણાય । દ્રોણોત્સેકાદિવિસ્મિતાય । પાર્થમન્યુનિરાકર્ત્રે ।
પાણ્ડવોત્સવદાયકાય । અઙ્ગુષ્ઠાક્રાન્તકૌન્તેયરથાય । શક્તાય ।
અહિશીર્ષજિતે । કાલકોપપ્રશમનાય । ભીમસેનજયપ્રદાય ।
અશ્વત્થામવધાયાસત્રાતપાણ્ડુસુતાય । કૃતિને । ઇષીકાસ્ત્રપ્રશમનાય ।
દ્રૌણિરક્ષાવિચક્ષણાય । પાર્થાપહારિતદ્રૌણિચૂડામણયે નમઃ ॥ ૯૦૦

ૐ અભઙ્ગુરાય નમઃ । ધૃતરાષ્ટ્રપરામૃષ્ટાભીમપ્રતિકૃતિસ્મયાય ।
ભીષ્મબુદ્ધિપ્રદાય । શાન્તાય । શરચ્ચન્દ્રનિભાનનાય ।
ગદાગ્રજન્મને । પાઞ્ચાલીપ્રતિજ્ઞાપાલકાય ।
ગાન્ધારીકોપદૃગ્ગુપ્તધર્મસૂનવે । અનામયાય ।
પ્રપન્નાર્તિભયચ્છેત્રે । ભીષ્મશલ્યવ્યથાપહાય । શાન્તાય ।
શાન્તનવોદીર્ણસર્વધર્મસમાહિતાય । સ્મારિતબ્રહ્માવિદ્યાર્થપ્રીતપાર્થાય ।

મહાસ્ત્રવિદે । પ્રસાદપરમોદારાય । ગાઙ્ગેયસુગતિપ્રદાય ।
વિપક્ષપક્ષક્ષયકૃતે । પરીક્ષિત્પ્રાણરક્ષણાય ।
જગદ્ગુરવે નમઃ ॥ ૯૨૦

ૐ ધર્મસૂનોર્વાજિમેધપ્રવર્તકાય નમઃ । વિહિતાર્થાપ્તસત્કારાય ।
માસકાત્પરિવર્તદાય । ઉત્તઙ્કહર્ષદાય । આત્મીયદિવ્યરૂપપ્રદર્શકાય ।
જનકાવગતસ્વોક્તભારતાય । સર્વભાવનાય । અસોઢયાદવોદ્રેકાય ।
વિહિતાપ્તાદિપૂજનાય । સમુદ્રસ્થાપિતાશ્ચર્યમુસલાય ।
વૃષ્ણિવાહકાય । મુનિશાપાયુધાય । પદ્માસનાદિત્રિદશાર્થિતાય ।
સૃષ્ટિપ્રત્યવહારોત્કાય । સ્વધામગમનોત્સુકાય ।
પ્રભાસાલોકનોદ્યુક્તાય । નાનાવિધનિમિત્તકૃતે । સર્વયાદવસંસેવ્યાય ।
સર્વોત્કૃષ્ટપરિચ્છદાય । વેલાકાનનસઞ્ચારિણે નમઃ ॥ ૯૪૦

ૐ વેલાનિલહૃતશ્રમાય નમઃ । કાલાત્મને । યાદવાય । અનન્તાય ।
સ્તુતિસન્તુષ્ટમાનસાય । દ્વિજાલોકનસન્તુષ્ટાય । પુણ્યતીર્થમહોત્સવાય ।
સત્કારાહ્લાદિતાશેષભૂસુરાય । સુરવલ્લભાય । પુણ્યતીર્થાપ્લુતાય ।
પુણ્યાય । પુણ્યદાય । તીર્થપાવનાય । વિપ્રસાત્કૃતગોકોટયે ।
શતકોટિસુવર્ણદાય । સ્વમાયામોહિતાશેષવૃષ્ણિવીરાય । વિશેષવિદે ।
જલજાયુધનિર્દેષ્ટ્રે । સ્વાત્માવેશિતયાદવાય ।
દેવતાભીષ્ટવરદાય નમઃ ॥ ૯૬૦

ૐ કૃતકૃત્યાય નમઃ । પ્રસન્નધિયે । સ્થિરશેષાયુતબલાય ।
સહસ્રફણિવીક્ષણાય । બ્રહ્મવૃક્ષવરચ્છાયાસીનાય ।
પદ્માસનસ્થિતાય । પ્રત્યગાત્મને । સ્વભાવાર્થાય ।
પ્રણિધાનપરાયણાય । વ્યાધેષુવિદ્ધપૂજ્યાઙ્ઘ્રયે ।
નિષાદભયમોચનાય । પુલિન્દસ્તુતિસન્તુષ્ટાય । પુલિન્દસુગતિપ્રદાય ।
દારુકાર્પિતપાર્થાદિકરણીયોક્તયે । ઈશિત્રે । દિવ્યદુન્દુભિસંયુક્તાય ।
પુષ્પવૃષ્ટિપ્રપૂજિતાય । પુરાણાય । પરમેશાનાય । પૂર્ણભૂમ્ને ।
પરિષ્ટુતાય નમઃ ॥ ૯૭૦

ૐ શુકવાગમૃતાબ્ધીન્દવે નમઃ । ગોવિન્દાય । યોગિનાં પતયે ।
વસુદેવાત્મજાય । પુણ્યાય । લીલામાનુષવિગ્રહાય । જગદ્ગુરવે ।
જગન્નાથાય । ગીતામૃતમહોદધયે । પુણ્યશ્લોકાય । તીર્થપાદાય ।
વેદવેદ્યાય । દયાનિધયે । નારાયણાય । યજ્ઞમૂર્તયે ।

પન્નગાશનવાહનાય । આધાય પતયે । પરસ્મૈ બ્રહ્મણે । પરમાત્મને ।
પરાત્પરાય નમઃ ॥ ૧૦૦૦

ઇતિ શ્રીકૃષ્ણસહસ્રનામાવલિઃ સમાપ્તા ।

Proofread by PSA Easwaran

*shrIkRRiShNasahasranAmAvaliH*

pdf was typeset on June 29, 2023

Please send corrections to *sanskrit@cheerful.com*